नं० १०६८-घ

शुकाष्टकम् सटीकम् (वेदान्तशास्त्रम्)
पत्राणि ४ (अपूर्णम्)

नं० १०६८-घ
कर्ता गङ्गाधरेन्द्र सरस्वती

४०३

सु० श्रीगणेशाय नमः ॥ ओं ॥ आनंदसिंधुमजमक्षरमद्वितीयमात्मान
१ मच्युतशिवं स्वगुरुं प्रणम्य ॥ कुर्वे समस्तजननिर्वृतिसौख्यसि
द्ध्यै श्रीमच्छङ्काष्टकसरोजविबोधभानुम् ॥१॥ इह खलु अनेकजन्म
संचितानंतसुकृतपरिपाकवशात्प्रक्षीणसर्वरागादिदोषविमुक्तांत
ष्करणोऽनेकजन्मानुष्ठितनित्यनैमित्तिकादिसत्कर्मोपासनक्रमा
र्जितविवेकवैराग्यशमदमादिसाधनसंपन्नो मुमुक्षुर्मोक्षसाध
नेतरति शोकमात्मविदिति श्रुतिविबोधिते आत्मतत्त्वज्ञाने समुदिता
भिलाषः प्राग्जन्मन्यभ्यस्तेष्वपि श्रवणमनननिदिध्यासनेषु बलव
त्तरप्रतिबंधादनुत्पन्नतत्त्वसाक्षात्कारसंपरेतः प्राप्य पुण्यकृतां लो
कानुषित्वा शाश्वतीः समा इत्यादि भगवद्दर्शितदिशा शुद्धानां श्रीमतां ज्ञा
नविज्ञानयोगैश्वर्यसंपन्नानां वा शिष्टानां कुले साक्षाद्भगवतो हरे
र्ज्ञानशक्त्यवतारेण भगवता बादरायणेन तपोध्यानसमर्हणप्रसादि
तस्य भगवतो महेश्वरस्य वरप्रभावात्पुत्रत्वेनावतीर्णैः श्रीमच्छंका
चार्यैः पूर्वाभ्यस्ततत्त्वबोधस्य प्रतिबंधक्षयेस्य तत एवोन्मेषात् पितुरुप
देशात् जनकोपदेशसंवादितः स्वानुभवाच्च करतलामलकवदपरो । राम
क्षीकृतात्मतत्त्वः कृतार्थतमः कृतकार्योपि विधिनिषेधशास्त्रे पुनः प्रव १

त्तोप्रयोजनाभावादेवत्यक्तसर्वकर्म्मा प्रव्रजिष्यन् स्वनिश्चयानभिज्ञैः सुहृ
द्भिः कर्म्मठैर्विधिनिषेधविषयप्रवृत्तिनिवृत्त्योरनुनीयन्निर्बध्यमानस्तेषा
मन्येषां च विवेको दयायतत्त्वविदां विधिकैंकर्य्यविधुरतां ज्ञानप्रभावव
र्णनमुखेन दर्शयन् स्वावधारितमात्मतत्त्वमुपदिशति भेदाभेदाविति
त्यादिना। त्रिभिः सत्वरजस्तमः संज्ञैर्गुणैरहितं त्रिगुणात्मकया सकार्य्या
विद्यया शक्त्या रहितं इतियावत् अतएव शब्देभ्यो लौकिकेभ्यो वैदिकेभ्य
श्चातीतं अतिक्रांतं तदविषयमित्यर्थः पंचविधा हि शब्दाः जातिवचना गु
णवचनाः क्रियावचनाः संज्ञाभूताः संबंधिशब्दाश्चेति यथा गौः शुक्लो
धावति भद्रको भारवाह इति जात्यादयश्च त्रैगुण्यविषये एव प्रसिद्धाः।
न निस्त्रैगुण्ये इति शब्दप्रवृत्तिनिमित्ताभावाच्छब्दातीतं तथाविधं त
त्त्वावबोधं तत्त्वमवाधितवस्तु तद्रूपं अवगतो बोध्योऽवबोधः साक्षात्कार
वृत्तौ स्वप्रकाशपूर्णसच्चिदानंदैकरसं भूमाख्यं ब्रह्म प्राप्य विस्मृतकं
ठचामीकरन्यायेन बोधमात्रेणलब्ध्वा नष्टसंदेहवृत्तेः सर्वसंदेहबीजभू
ताज्ञाननाशादेव नष्ट इष्टानिष्टसाधनहेयोपादेयगोचरसंदेहवृत्तयोऽप
स्य + ॥ भेदाभेदौ सपदि गलितौ पुण्यपापे विशीर्णे मायामोहौ क्षयमधि
गतौ नष्टसंदेहवृत्तेः। शब्दातीतं त्रिगुणरहितं प्राप्य तत्त्वावबोधं निस्त्रैगुण्ये
पथि विचरतः को विधिः को निषेधः॥१॥ +

भ० अतएवनिस्त्रैगुण्येनिर्गतास्त्रैगुण्यास्तामसाविषयिणोराजसाःकर्म्मिणः
२ सात्विकाउपासकाश्चयस्मात्तथाविधेनिर्विकल्पपरमसमाधिरूपेसप्त
मयोगभूमिकालक्षणेपथिविचरतःस्वच्छंदंविहरतोममकोविधिःपुन
रग्निहोत्रादिककर्म्मसुप्रवर्त्तयेत् कोवानिषेधोनैष्कर्म्यस्वरूपावस्थिते
निवर्त्तयेन्नकश्चिदपितत्समर्थइत्यर्थः येहित्रैगुण्यपथिकादेहाअहंभा।
वाःपुण्यफलरागिणःपापफलभीरवःसाध्यसाधनेतिकर्तव्यताभेदद
र्शिनःकर्त्तृत्वभोक्तृत्वस्वभावमात्मानंमन्यमानाःपूर्णसच्चिदानंदाद्वय
ब्रह्मात्मभावादर्शिनस्तानहीष्टानिष्टफलकीर्त्तनेनरागभयोद्दीपनपुर
स्सरंतत्साधनेषुप्रवर्त्तयेन्निवर्त्तयेद्वाविधिर्निषेधोवशीकुर्य्यात्तांमनुमां
यतोममतद्वत् भेदाभेदौभेदश्चाभेदश्चभेदाभेदौप्रतिदेहंमोक्षकल्पि
तआत्मभेदः भिन्नस्यतस्यदेहादौतादात्म्याध्यासलक्षणोऽभेदश्चतौ
हिरागद्वेषाभिमानादिद्वारासर्वानर्थहेतू तौसयदितत्वसाक्षात्कारस
मकालमेवगलितौ यावद्धिभेददर्शनंतावदेवभयात्तिरागद्वेषादयःद्वि
तीयाद्वैभयंभवति मृत्योःसमृत्युमाप्नोति यइहनानेवपश्यति यथोदकं राम
दुर्गेवृष्टंपर्वतेषुविधावति एवंधर्मान्पृथक्पश्यंस्तानेवानुविधावतिस
योन्यांदेवतामुपास्तेअन्योसावन्योहमस्मीतिनसवेदयथापशुःपशुरेव २

स देवानां सर्वैर्नैव रेमे स द्वितीयमैच्छत् सोकामयत जाया मे स्यादथ प्रजायेया
थ वित्तं मे स्यादथ कर्म्म कुर्वीयेत्येतावान् वै काम इत्यादिश्रुतिभ्यः एवं देहाद्य
भिन्नात्मदर्शनमप्यनर्थहेतुः अयं लोको नास्ति पर इति मानी पुनः पुनर्वशमा
पद्यते म इत्यादिमृत्युवचनात् स्मृतिरपि देहाभिमानाद्यस्यापं न तद्वेद
कोटिभिः प्रायश्चित्ताद्भवेच्छुद्धिर्न्नृणां गोवधकारिणां देहाभिमानिनांपुं
सां प्रायश्चित्तं न विद्यते अत एव बहिःपुण्यपापेषु पुण्यधर्म्मानुष्ठानजन्यमपू
र्वं पापमधर्म्मानुष्ठानजन्यमपूर्वं पापं ते अपि विदुषो लोष्ठप्रहतलोष्ट
पांशुरिव विध्वस्ते तदधिगम उत्तरपूर्वाघयोरश्लेषविनाशाविति सूत्रव
चनात् तद्यथेषिकातूलमग्नौ प्रोतं प्रदूयेतेत्यादिश्रुतिभ्यश्च तस्मात् यतो
मायामोहौ क्षयमधिगतौ अद्वितीयपूर्णसच्चिदानंदब्रह्मात्मस्वरूपतिरो
धायकावरणशक्तिप्रधानविद्या मायानुआवृतस्य तस्यैवान्यथाप्रति
भासनिमित्तविक्षेपशक्तिप्रधानोमायासा एकस्या विद्याया स्तमोगुणप्र
धानांश आवरकत्वात् मोह इत्युच्यते रजोगुणप्रधानस्तु विक्षेपहेतुत्वान्मा
येति तौ मायामोहौ सत्योत्कर्षप्रयुक्तशमदमादिसंपत्तिपूर्वकेणात्मतत्व
साक्षात्कारेण क्षयं सहकार्य्येण संतिकवाधमधिगतौ प्राप्तौ तथा च।
विधिनिषेधशास्त्रयोन्सर्वे प्रमाणप्रमेयव्यवहारस्याविद्यावद्विषयत्वात्

श्र० निरस्ताविद्यस्य पूर्णानंदाद्वितीयब्रह्मभूतस्य मम न विधिनिषेधशास्त्रवि
२ षयत्वमित्येतत्सिद्धमिति भावः १ आत्मनत्वज्ञानैर्विधिनिषेधगोचर
प्रवृत्तिनिवृत्तिविषयसाध्यसाधनेतिकर्त्तव्यतादिसर्वद्वैतोपमर्द्दात्तस
3 स्य विधिनिषेधाऽनाक्रमणीयत्वमित्याह यद्वेति यद्वेति प्रकारांतरेण।
क्तार्थोपपत्तिद्योतनार्थं ननु भेदाभेदयोर्बोधमात्रात्कथं निवृत्तिः तत्त्व*
ज्ञानस्य सत्यार्थनिवर्त्तनाऽसामर्थ्यात् नहि बोधमात्रात् वस्तुतो भिन्नो
प्यभिन्नत्वमापद्यते भेदश्च प्रतिशरीरमात्मनां सुखदुःखव्यवहारव्य
वस्थादर्शनात् लोकतः शास्त्रतश्च सत्योवगम्यते ऐकात्म्ये हि एकस्य
सुखेदुःखे च सर्वे सुखिनो दुःखिनो वा स्युः तथा च भगवता गौतमेना।
प्युक्तं नानात्मानो व्यवस्थातः इति लौकिकवैदिकादिव्यवहारव्यवस्था
चैकात्म्येनोपपद्यते नहि मित्रार्युदासीनमध्यस्थादिगोचरो रागद्वेषो
पेक्षादिप्रयुक्तो लोकसंमतो व्यवहारः परद्रव्यपरदारपरद्रोहादिवर्ज
नविषय आचार्यपितृवृद्धाद्यनुगमनपूजनादिविषयः श्रौतः स्मार्त्त।
श्च व्यवहारव्यवस्थित उपपद्यते तस्मान्नानात्मत्वमेवेत्याशंकामपा राम
कुर्वन्नाह सकलवपुषामेकमिति सकलवपुषां जरायुजां॥ ॥ यद्वात्मा
न सकलवपुषामेकमंतर्बहिस्थं दृष्ट्वा पूर्णं खमिव सततं सर्वभांडस्थमेकं॥ २

नान्यत्कार्य्यं किमपि च ततः कारणाद्भिन्नरूपं निस्रैगुण्येन॥२॥ ॥दुजस्वेद
जोद्भिज्जआप्यतैजसवायव्यमानसप्रभेदादष्टधा भिन्नानां शरीराणामंत
र्बहिःस्थमेकमभिन्नमित्यर्थः अयंभावः न तावद्भेदादेः सत्यताप्रमाणावे
द्यत्वे सति वेद्यत्वात् शुक्तिरूप्यादिवत् यथा च भेदस्य प्रमाणावेद्यत्वं तथो
पपादितमस्माभिः स्वाराज्यसिद्धौ एवमात्मनो देहेंद्रियादिना तादात्म्यल
क्षणोऽभेदोऽपि न प्रमाणवेद्यः स्वात्मनि नानात्वाऽननुभवात् देहादीनां
च नानात्वात्साल्प्याद्यवस्थाभेदेनांध्यबाधिर्य्यादिना च देहेंद्रियादेर्व्यभि
चारेप्यात्मन्यबाधितप्रत्यभिज्ञयैकत्वनिश्चयेन तैः सर्वैस्तस्याऽभेदाऽ
योगात् एकैकतादात्म्येऽपि विनिगमनाविरहादतिरिक्तत्वसिद्धेरिति न
नु कथं सकलवपुषामेक आत्मा स हि बालाग्रशतभागस्य शतधाक
ल्पितस्य च भागो जीवः स विज्ञेयः एषोऽणुरात्मा चेतसा वेदितव्यः इ
त्यादिश्रुतिभिरणुत्वरनाडीछिद्रोपसर्प्पणलिंगैश्चाणुपरिमाणो
विज्ञायते यद्यपि च सर्वांगीणशैत्याद्युपलम्भात् समः प्लुषिणा समो मश
केन समो नागेनेत्यादिश्रुत्या च देहपरिमाणोऽभ्युपगम्येत तथापि देह
द्वयांतरालविच्छिन्नवृत्तिनसकलवपुषामेकस इत्याशंक्याह अंत
र्बहिःस्थमिति देहस्यांतर्बहिश्च स्थितं तं विभुमित्यर्थः नित्यं विभुंस